No. १२६९

Title नञ् वाद दीपिनी

Author श्रीरघुदेव भट्टाचार्यः

Extent १८ Age १८१२

Subject न्याय वैशेषिकम्

दीप

नञ्वाद टि[illegible]नी नञ्वादार्थ विवेचनं वा

१२७५

नरहंटीका २११
६५०

न॰ वा॰ टी॰ ॥ श्रीगणेशाय नमः ॥ श्रीसिद्धिबुद्धिसहितवक्रतुण्डाय नमः ॥ श्रीभवानीशंकराभ्यां नमः ॥ हेरम्बो विजयते ॥ शिवं प्रण
१ म्य तत्पश्चात्तर्कवागीश्वरं गुरुम् ॥ क्रियते रघुदेवेन नञ्वादार्थविवेचनम् १ तत्सादृश्यमभावश्च तदन्यत्वं तदल्प
ता अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः इति गाथायां सादृश्यादौ नञः शक्तिभ्रमं निराकर्तुं नञः शक्य नि॰
तावच्छेदकमेव स्थापयति । संसर्गाभावश्चेत्यादि ॥ संसर्गाभावत्वमन्योन्याभावत्वं च नञः शक्यतावच्छेदकमि
त्यर्थः संसर्गाभावत्वं च ध्वंसप्रागभावादौ संसर्गाभाव इति प्रतीतिसाक्षिको ऽतिरिक्तो ऽखण्डोपाधिः ॥ अन्ये
तु संसर्गाभावत्वं संसर्गारोपजन्यप्रतीतिविषयाभावत्वम् ॥ न चाभावबुद्धौ प्रतियोगिसंसर्गारोपस्य हेतुत्वमाना
भावान्नेदं युक्तमिति वाच्यं तथाविधकार्यकारणभावाकल्पने प्रतियोगिज्ञानकाले सर्वत्र एकदा नानासंबंधावच्छि
न्नप्रतियोगिताकनानाभावलौकिकप्रत्यक्षापत्तेः ॥ तत्तत्संबंधावच्छिन्नतत्तत्प्रतियोगितावच्छेदकावच्छिन्न
प्रतियोगिताकाभावलौकिकप्रत्यक्षं प्रति तत्तत्प्रतियोगितावच्छेदकावच्छिन्नीयतत्तत्संसर्ग[illegible]ज्ञानस्य हेतुत्वे तु तुल्ये २
प्रतियोगिज्ञानकाले सर्वत्र एकदा नानासंबंधज्ञानाभावेन नानासंबंधावच्छिन्नप्रतियोगिताकनानाभाव श्री
लौकिकप्रत्यक्षापत्त्यसंभव इति तथाविधकार्यकारणभावकल्पनाया आवश्यकत्वात् नन्वेवं सत्यभावलौ १

ज्ञान

किकप्रत्यक्षं प्रति प्रतियोगितावच्छेदकप्रकारज्ञानहेतुताविलोपप्रसंगः प्रतियोगितावच्छेदकप्रकारकं ईश्वरस्य काले तथा
विधसंसर्गज्ञानाभावेनैवाभावलौकिकप्रत्यक्षापत्तिवारणसंभवादिति वाच्यं॥ संसर्गज्ञानजनकतावच्छेदककोटौ क२
प्रतियोगितावच्छेदकप्रकारकत्वनिवेशप्रयोजनाभावेन द्रव्यत्वप्रकारकघटत्वावच्छिन्नीयसंसर्गज्ञानका
ले घटत्वप्रकारकज्ञानाभावदशायां घटत्वावच्छिन्नप्रतियोगिताकाभावलौकिकप्रत्यक्षापत्तेर्दुर्वारत्वेन ता
दृशकार्यकारणभावकल्पनाया आवश्यकत्वादित्यवदंति॥ तन्न॥ अतींद्रियसंसर्गाभावतादृशधर्माभावे
न नञ्त्वस्यतावच्छेदकस्य तत्साधारण्यानुपपत्तेः॥ एवमन्योन्याभावत्वमप्यखंडोपाधिः॥ ननु तादात्म्यसंबंधाव
च्छिन्नप्रतियोगिताकाभावत्वं तत्संयोगितादात्म्यस्य संयोगरूपतया संयोगिनोऽत्यंताभावेऽतिव्याप्तिः संबंधविध
यतातादात्म्यनिष्ठावच्छेदकताया अनिवेशेऽपि संयोगसंबंधावच्छिन्नसंयोगावच्छिन्नप्रतियोगिताकाभावेऽति
व्याप्तेर्दुष्परिहरत्वादिति॥ वस्तुतस्तु॥ अन्योन्याभावस्य प्रतियोगितावच्छेदकसंबंधमानाभावेन तादात्म्य
स्य तत्प्रतियोगितावच्छेदकसंबंधत्वाभावान्नादृशलक्षणमसम्भवदुक्तिकमेव॥ न चैवमभावमात्रस्यैव प्रतियो
गितावच्छेदकसंबंधसद्भावे प्रमाणाभाव इति वाच्यं॥ अत्यंताभावस्य प्रतियोगितावच्छेदकसंबंधानंगीकारे वा

न॰ वा॰ टी॰ धर्मबुद्धिप्रतिबध्यतावच्छेदकनिर्वाचनानुपपत्तेः ॥ तथा हि घटाभावप्रकारकज्ञानस्य प्रतिबध्यतावच्छेदकं न घटप्रकार
२ कज्ञानत्वं घटाभाववत्ताज्ञानकालकत्वावच्छिन्नके न चित्तसंबंधेन घटप्रकारकज्ञानमुत्पद्यते केनचित्संबंधेन तत्त्वे
तिनियमानुपपत्तेः तथा च तादृशत्वानियमानुरोधेन तेन संबंधेन तत्प्रकारकबुद्धिं प्रति तत्संबंधावच्छिन्नतन्निष्ठ
प्रतियोगिताकाभाववत्तानिर्णयस्य प्रतिबंधकताया आवश्यकत्वे तत्त्वेनात्यन्ताभावप्रतियोगितावच्छेदकसं
बंध सिद्धिः ॥ नन्वेवमन्योन्याभावस्यापि तत्सिद्धौ युक्तिस्तुल्येति वाच्यं ॥ घटत्वप्रकारकबुद्धिं प्रति घटान्योन्या
भाववत्तानिर्णयत्वेन प्रतिबंधकत्वकल्पनेनैव सामंजस्ये विनाऽन्योन्याभावप्रतियोगितावच्छेदकसंबंधं प्र
तिबंध्यप्रतिबंधकभावानुपपत्तिरूपबाधकाभावेन युक्तेरतौल्यात् ॥ ननूभयधर्मस्यान्यतावच्छेदकत्वे गौ
रवेण लाघवाद्भावत्वरूपैकधर्मस्यैव तदवच्छेदकत्वस्वीकारस्तु चितः इति संसर्गाभावश्चैतादृशयोऽलघ्वक
इति चेन्न ॥ घटो नास्तीत्यादौ संसर्गाभावत्वप्रकारकबोधानुभवानुरोधेन घटः पटो नेत्यादौ अन्योन्याभावत्वप्रका श्री
रकबोधानुभवानुरोधेन चतयोक्तत्वात् ॥ वस्तुतस्तु ॥ घटो नास्तीत्यादौ घटात्यन्ताभावत्वप्रकारकबोध एवोत्प २
द्यते न तु संसर्गाभावत्वप्रकारकबोधः ॥ तथानुभवस्य विवादग्रस्तत्वादिति ॥ तथा चात्यन्ताभावत्वमेव नञः

शक्यतावच्छेदकं न तु संसर्गाभावत्वमपि ॥ न चैवं संसर्गाभावश्चेति ग्रंथविरोधः ॥ स्वावच्छिन्नप्रतियोगितात्मकत्वसंबंधेन सं
सर्गविशिष्टाभावस्य तदर्थत्वात् ॥ तादृशाभावश्चोपदर्शितरूपाभावत्वगत्या ऽसंसर्गाभाव एवेत्यन्ताभावत्वस्य नञः शक्यताव
च्छेदकत्वेक्षतिविरहः ॥ ननु तथानुभवानंगीकारे ऽभावत्वस्यैव नञः शक्यतावच्छेदकत्वोचितेन तादृशधर्मरूपेण नञः शक्यता
वच्छेदकत्वाभ्युपगमो निरर्थकः ॥ संसर्गाभावश्चेत्यादिग्रंथस्वरसस्तु शक्यप्रदर्शनपरो न शक्यतावच्छेदकप्रदर्शनपर इति नानु
पपत्तिगंधोपीति चेन्न अत्यंताभावत्वाद्यतिरिक्ताभावत्वे प्रमाणाभावेन तथा वक्तुमशक्यत्वात् ॥ अभाव इत्याकारकप्र
तीतेरत्यंताभावत्वान्योन्याभावत्वध्वंसत्वाद्यन्यतमविषयकत्वाभ्युपगमेन तद्विषयपितत्सिद्धेरभावात् ॥ न चैवं लाघवा
न्नञः शक्यतावच्छेदकतया तत्सिद्धिरिति वाच्यम् ॥ लाघवानुरोधेन कस्य शक्यतावच्छेदकतयातिरिक्तधर्मस्वीकारे वि
भुपदस्य शक्यतावच्छेदकतयापि विभुत्वरूपपदार्थांतरसिद्धिप्रसंगात् ॥ नानार्थस्योच्छेदप्रसंगाच्च ॥ तत्रापि सर्वसा
धारणातिरिक्तधर्मविशेषस्वीकर्तव्यतया तस्यैव शक्यतावच्छेदकत्वस्वीकारौचित्यात् ॥ एवमभावत्वस्य नञः शक्यता
वच्छेदकत्वे नञ्पदादेकदैव यावदभावोपस्थितिकल्पनागौरवं दुष्परिहरमेव ॥ अत्यंताभावत्वान्योन्याभावत्ववि
शिष्टशक्तिज्ञानकाले चात्यंतान्योन्याभावानामुपस्थितिर्नतु नञ्पदात्सर्वत्र एकदा यावदभावोपस्थितिर्जायत इति

विषय१

यो: शक्यतावच्छेदकत्वे तु अत्यंताभावत्वविशिष्टशक्तिज्ञानकाले अत्यंताभावानामुपस्थितिरन्योन्याभावत्व२

न्या॰टि॰ लाघवमस्वरसितमेवेति॥ नन्वेवं सति घटेनास्तीत्यादिसमभिव्याहारज्ञानकार्यतावच्छेदकं घटप्रतियोगिकासत्ताभावादिवि
३ षयकशाब्दबुद्धित्वं न तु घटत्वावच्छिन्नप्रतियोगिताकाभावबुद्धित्वं तत्रावच्छिन्नत्वादिप्रवेशे गौरवात्॥ तथा च य
3 त्किंचिद्घटवति भूतलादौ घटेनास्तीत्यादिवाक्यात्॥ तथाविधप्रमात्मकबोधोत्पादे बाधकाभावेन तत्र तादृशवाक्य
स्य प्रमाणत्वापत्तिरिति समाधत्ते आहात्रेति॥ कस्य पदजन्यशाब्दबोधे इत्यर्थः॥ अन्वयितावच्छेदकावच्छिन्नप्रतियोगिता
कत्वमिति॥ अभावविशेषणीभूतप्रतियोगिविशेषणावच्छिन्नप्रतियोगितासंबंधावच्छिन्नप्रतियोगिप्रकारता
कत्वमित्यर्थः॥ शुद्धस्यातिबलात्सिद्धमिति॥ नन्वेवं समभिव्याहृतेतरपदज्ञानप्रयोज्यमित्यर्थः॥ नन्वेवं समभि
व्याहृतेतरपदज्ञानात्तथाविधशाब्दबोध एवोत्पद्यते इति तत्रेत्यादि सिद्धमित्यंतस्य पर्यवसितार्थः॥ अन्यथोदूष
घ६ णमाह॥ नीलघटवतीत्यादि॥ इदं इत्याद्यवहारादिति इत्यादिवाक्यात्प्रमात्मकबोधानुदयादित्यर्थः॥ तथा च गौरवेऽपि शास्त्यार्थ
सत्पदर्शितसमभिव्याहारज्ञानस्य कार्यतावच्छेदकमुपदर्शितप्रकारकत्वमवश्यं वक्तव्यं अन्यथा उपदर्शितबाध श्री
कस्य विद्यमानत्वात् तथा च यत्किंचिद्घटवति घटत्वावच्छिन्नप्रतियोगिताकाभावासत्त्वेन तत्र घटो नास्ती
त्यादिवाक्यात्प्रमात्मकबोधानुदयात्तत्र तादृशवाक्यस्याप्रामाण्यमिति भावः। दूषणांतरमप्याह इदमपी २

स४

तद्घटवतीत्यादि। इत्यादिव्यवहारादित्यादेः नीलघटत्वावच्छिन्नप्रतियोगिताकाभावविषयकबोधस्यानुभवात्॥ त
च२ थानन्वसमभिव्याहृतज्ञानजन्यतावच्छेदककोटावन्वयितावच्छेदकावच्छिन्नप्रतियोगित्वविषयताया अनिवेशेनाहृ
शानुभवापलापश्च इति भावः॥ अत्रेदं तत्त्वं॥ यत्र अन्वयितावच्छेदकावच्छिन्नप्रतियोगित्वं प्रसिद्धं तत्रान्वयितावच्छेद
कावच्छिन्नप्रतियोगितासंबंधावच्छिन्नतादृशप्रकारताया एव तादृशासमभिव्याहारज्ञानकार्यतावच्छेदकत्वं कं
बुग्रीवादिमान्नास्तीत्यादौ न स्यद समभिव्याहारज्ञानकार्यतावच्छेदकं न कंबुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिता
संबंधावच्छिन्नतथाविधप्रकारतांशालित्वं गुरुधर्मे अभावप्रतियोगितावच्छेदकत्वाभावेन कंबुग्रीवादिमत्वावच्छि
न्नप्रतियोगिताया अप्रसिद्धत्वेन तथात्वं तु अशक्यत्वात् किंतु तत्र कंबुग्रीवादिमत्त्वनिष्ठसांसर्गिकविषयतानिरूपि
त अवच्छेदकत्वनिष्ठसांसर्गिकविषयतानिरूपितनिरूपितत्वनिष्ठसांसर्गिकविषयतानिरूपितप्रतियोगित्वनि
ष्ठसांसर्गिकविषयताया एव तत्त्वं॥ तथा सति नानुपपत्तिः॥ तादृशवाक्यजन्यबोधे अवच्छेदकत्वांशे कंबुग्रीवा
दिमत्त्वस्य भ्रमत्वस्वीकारात्॥ न चेदमप्युक्तं भ्रमत्वं हि तदभाववति तत्प्रकारकत्वं तत्र चाच सांसर्गिकविषयता
यां प्रकारत्वविरोधितात्वाभावेन संबंधांशे भ्रमत्वं दुरुपपन्नं॥ न च तदभाववन्निष्ठविषयतायां प्रका निरू
पा

न·वा·टी· पितत्वनिष्ठविषयताशालिज्ञानत्वमेव भ्रमत्वमिति वाच्यं ॥ तथा सति इदं रजतमिति ज्ञाने इदमंशे ऽपि भ्रमत्वा
४ पत्तेरिति चेन्न ॥ सांसर्गिकविषयतायामपि प्रकारतात्वविशेष्यतात्वस्वीकारात् ॥ न चैवं सति अवच्छेदकत्वे कंबुग्री
वादिमत्वाभावनिर्णयदशायां कंबुग्रीवादिमान्नास्तीति प्रतीत्यनुपपत्तिः ॥ भवन्मते तस्यास्तादृशबाधप्रति
बध्यतावच्छेदकाक्रान्तत्वादिति वाच्यं ॥ इष्टापत्तेः ॥ बाधप्रतिबध्यतावच्छेदककोटौ प्रकारतायां सांसर्गिकविषय
ताभिन्नत्वस्यैवानिवेशात् ॥ केचित्तु ॥ कंबुग्रीवादिमान्नास्तीत्यादौ अभावांशे घटत्वावच्छिन्नप्रतियोगितासं
बंधेन कंबुग्रीवादिमत्वविशिष्टस्य भानमुपेयते ॥ तथा चेयं प्रतीतिः कंबुग्रीवादिमत्वविशिष्टांशे भ्रमात्मिका
अन्वयितावच्छेदकावच्छिन्नप्रतियोगित्वस्यैवान्वयितावच्छेदकविशिष्टस्यसंबंधत्वांगीकारेण प्रकृते घ
टत्वावच्छिन्नप्रतियोगितायां कंबुग्रीवादिमत्वविशिष्टस्यसंबंधत्वाभावेन तेन संबंधेन तदभाववति तदभाव
तत्प्रकारकत्वस्य विद्यमानत्वात् ॥ अथवाऽभावबुद्धौ सर्वत्राभावांशे प्रतियोगितासंबंधेन प्रतियोगिनो भाने
वत्त्वावच्छिन्नप्रतियोगिताकत्वसंबंधेनान्वयितावच्छेदकस्यापि भानांगीकारः ॥ तथा च कंबुग्रीवादिम श्री
त्वावच्छिन्नप्रतियोगिताया अप्रसिद्धत्वेन कंबुग्रीवादिमान्नास्तीत्यादौ घटत्वावच्छिन्नप्रतियोगिता ४

र्थत्वात् ॥ ७ ॥ ज्ञसमूहालंबने च घटविषयतानिरूपितत्वविषयतातो भिन्नापि अभावविषय
तानिरूपिताघटत्वविषयतांगीक्रियते इति तथाविधविषयताभिन्नाभावविषयतानिरूपितघटत्ववि
ग २ षयतारूपत्वात्तत्रैव घटत्वभानपदार्थस्य सत्वेन तथाकारकज्ञानं बाधकाभावात् घटो नास्तीत्यादौ
तु घटनिष्ठविषयतानिरूपितघटत्वप्रकारतया अभावनिष्ठविशेष्यतानिरूपितप्रकारतया
ऐक्येन न तत्र भिन्नत्वाभावान्न स्यात्तेन घटत्वभानमिति न घटत्वं नास्तीत्याकारकज्ञानापत्तिरित्याहु
: ॥ एवं लोहितवह्निर्नास्तीत्यादौ वह्नित्वावच्छिन्नप्रतियोगित्वमेव संबन्धविधया भासते ननु

लोहितसविशिष्टवह्नित्वावच्छिन्नप्रतियोगित्वं लोहितसविशिष्टवह्नित्वस्याप्रसिद्धत्वादिति॥ नचैवं आन्व
यितावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नप्रतियोगितासंबंधेन अभाववांस्तोप्रतियोगिनोभानसन
न्यदन्यत्रशाब्दबोधे नियमान्नेयं रीतिः संभवतीति वाच्यं॥ आन्वयितावच्छेदकतापर्याप्त्यधिकरणावच्छि
न्नप्रतियोगित्वं प्रसिद्धं यत्र तत्र तादृशान्यभागाकारेणानुपपत्त्यभावादित्यादि बहुतरं स्वयमूहनीयं
॥ यंत्रु॥ नीलघटोनास्तीत्याद्यभावोपि नीलघटत्वावच्छिन्नप्रतियोगिताकं॥ छ छ छ छ॥

संबंधेनैव कंबुग्रीवादिमत्त्वस्य भानाभ्युपगमेन तस्याः कंबुग्रीवादिमत्त्वांशे भ्रमत्वमुपपद्यते ॥ घटत्वावच्छिन्नप्रतियोगि
तोयां घटत्वस्यैव संबंधत्वेन तत्र तेन संबंधेन कंबुग्रीवादिमत्त्वाभाववति अभावे कंबुग्रीवादिमत्त्वप्रकारकत्वस्य सत्त्वा
त् ॥ न चैवं सति सर्वेषामभावप्रतीतौ स्वावच्छिन्नप्रतियोगिताकत्वसंबंधेनाचार्यमतावच्छेदकभानांगीकारे घटो
नास्तीति प्रतीतेः घटत्वं नास्तीत्याकारकत्वापत्तिः ॥ अभावांशे घटत्वविषयकज्ञानस्य तदाकारत्वादिति वाच्यं ॥
भा० ५ यत्र स्वातंत्र्येणाभावांशे घटत्वं सत्तेन स्यैव तदाकारत्वेन प्रकृते अभावांशे पारतंत्र्येणैव घटत्वभानांगीकारात्तादृश
प्रतीतेस्तदाकारत्वाभावात् ॥ न चैवं स्वातंत्र्येण घटत्वस्य भाने नाम अभावातिरिक्तांशे अप्रकारीभूय घटत्वस्य
भानात् तथा च यत्र घटो नास्ति घटत्वं नास्तीति समूहालंबनात्मिकायां प्रतीतेस्तत्र तस्या घटत्वं नास्तीत्याकारकत्वा
नुपपत्तिः ॥ तत्राभावातिरिक्तांशे घटे घटत्वस्य प्रकारत्वेन तत्र तस्य स्वातंत्र्येण प्रकारत्वादिति वाच्यं ॥ घटनिष्ठ
विषयतानिरूपितसमवायसंबंधावच्छिन्नघटत्वविषयताभिन्नाभावनिष्ठविषयतानिरूपितघटत्वविषयता
या एव स्वातंत्र्येण घटत्वभानपदाबंधेन नीलघटं विषयीकुर्वतो धीत्वादे स्वगुरुधर्मस्य प्रतियोगितावच्छेदकत्वांगी
कारेणान्यथा तत्राचार्यमतावच्छेदकीभूतयद्भेदसंबंधघटितसामानाधिकरण्यसंबंधेन नीलविशिष्टघटत्व

न॰वा॰ तसमसमवायसंबंधघटितसामानाधिकरण्यसंबंधेन नीलरूपविशिष्टस्य घटत्वं नरूपेस्ययाणु तयात्यन्ताभावप्रतियोगि
१६ तानवच्छेदकत्वेन न तद्वति च प्रतियोगितायाश्च समभिव्याहृत्वेन तेन संबंधेन तत्र नीलघटभानस्यासंभवादिति ॥ तत्र गु
न णधर्मस्य प्रतियोगितावच्छेदकत्वे पिकबुद्धौ वादिमान्नास्तीत्यादौ द्वितीयापदशीर्णतया तत्रापि बोधसंभवेनानुपपत्त्याभावा
6 त् ॥ वस्तुभूतले न घट इत्यादौ नञा भूतलपदजन्यशाब्दबोधे धिकेधं न घटसंसर्गाभावो भासते ॥ न च नञ्पदजन्यसमस
र्गाभावविषयकशाब्दबुद्धिं प्रति नञुत्त्योगिबोधकपदसमभिव्याहृतजसप्तमीपदज्ञानत्वेन हेतुत्वान्नात्र जयावोधाप
त्तिरिति वाच्यं ॥ चैत्रेण न पचनीत्यादिवाक्यजन्यपाकानुकूलकृत्यभावविषयकशाब्दबोधे व्यभिचारेण तथाकेन्कैका शा६
त्वादित्यत आह ॥ प्रतियोग्यभावान्वयादित्यादि अभावान्वयः प्रतियोग्यन्वयेन तुल्ययोगक्षेमः तथा च यत्र नञ्स
मभिव्याहारं विनायत्प्रतियोगिनिरूपितसंबंधः संबंधविधया भासते तेन नञ्समभिव्याहारे सति तत्र तदभावसंबंधोपि
संबंधविधया भासते यत्र नञ्समभिव्याहारं विनायत्प्रतियोगिसंबंधः प्रकारविधया भासते तेन नञ्समभिव्याहा
रे सति तत्र तदभावसंबंधोपि तथैवेति तु पर्यवसितोर्थः ॥ ॥ अत्र प्रथमोक्तमनुघटत्वग्रहाहारनि ॥ तेनेत्यादि ॥ तेन उप श्री
दर्शितं तुल्ययोगक्षेमनियमेन ॥ आधाराधेयभावसंबंधेनैवान्वयः ॥ आधाराधेयभावसंबंधस्य संबंधविध १६

योवान्वयः ॥ संसर्गाभावस्य ॥ संसर्गाभावसंबंधस्य तथा ॥ संबंधविधयैवान्वयः ॥ तथाइत्यनंतरं इति फलितमिति पूरणी
य ॥ उपदर्शितफलितार्थस्य उदाहरणं ॥ यथा पचति चैत्र इत्यादि ॥ वैयाकरणमते आख्यातस्य कर्तृवाचकतया न – च
ति चैत्र इत्यादौ पाकानुकूलकर्तुरन्योन्याभाव एव प्रतीयत इत्युपदर्शितार्थोदाहरणं च न तत्र संभवति इत्युदाहरणांतर
माह ॥ चैत्रस्य दंनमैत्रस्य त्वाहिना प्रथमांतपदोपस्थापित एव तथा प्रथमांतपदोपस्थापितचैत्रादौ आधाराधेयभा
वसंबंधस्य संबंधविधया ऽन्वयः ॥ तदभावस्यापि ॥ तिङाद्युपस्थापितकर्त्राद्यभावस्यापि ॥ तथा संबंधविधया ऽ
न्वयः तथा यदि हि वैशिष्ट्यकयत्संसर्गकयत्प्रकारकशाब्दबुद्धिं प्रति यादृशसमभिव्याहारज्ञानं कारणं तद्वैशिष्ट्यकत
त्संबंधावच्छिन्नप्रतियोगिताकतदभावप्रकारकविशेषणताविशेषसंसर्गकशाब्दबुद्धिं प्रति तादृशसमभिव्याहृ
तनञ्समभिव्याहारज्ञानस्य हेतुत्वं कल्पनाद् भूतलं न घट इत्यादौ न घटसंसर्गाभावबोधः ॥ अत्र तथा समभिव्या
हृतनञ्समभिव्याहृतज्ञानस्य हेतोरभावादिति भावः ॥ ननु नेदं चैत्रस्य साक्षादाधाराधेयभावसंबंधावच्छिन्नप्रतियोगिताका
भावाचयबोधोदाहरणप्रदर्शनमसंगतं तत्र षष्ठ्यर्थस्य स्वामित्वरूपतया न स्वप्रतियोगिकत्वसंबंधावच्छिन्नप्रतियोगि
ताकाभावस्यैव बोधादिरित्यत आह पष्ठ्यादेरित्यादि ॥ स्वत्वे चैत्रनिरूपितत्वप्रदर्शनं तु तेन संबंधेन चैत्रस्यान्वयप्र

न॰वा॰ दर्शनाय ॥ नन्विष्टं चैत्रादिनिष्ठस्वत्वस्य न चैत्रे चैत्रत्वादेर्बोधः आक्षेपिकानुपपत्तिरित्यत आह निरूपकत्वादेः संबंध
स्येति ॥ स्वत्वनियामकनये निरूपकः। तथा च स्वत्वनियामकसंबंधस्यैवाभावप्रतियोगितावच्छेदकत्वेन निरूपक
त्वसंबंधस्य स्वत्वनियामकनयानंतरं संबंधावच्छिन्नप्रतियोगिताकस्वामित्वाभावस्याप्रसिद्ध्या नेदं चैत्रस्य स्वत्वादौ न प्रा
7 बोधसंभवे नाधिकरणतासंबंधावच्छिन्नप्रतियोगिताकस्वामित्वाभावबोधस्यैवाभ्युपगमे चैत्रधनं नेदं चैत्र
स्येति व्यवहारोपपत्तेरिदं स्वत्वनये षष्ठ्याः स्वत्वार्थकत्वांगीकारस्याव रूपकनया नेदं चैत्रस्य स्वत्वादावाधाराधेयभा
वसंबंधावच्छिन्नप्रतियोगिताकाभावान्वयबोधोदाहरणप्रदर्शनं नासंगतमिति भावः ॥ इदं तु स्वत्वनियामक
संबंधावस्याभावप्रतियोगितानवच्छेदकत्वांगीकर्तुः प्राचीनस्य मतेनोक्तं ॥ स्वमते तु स्वत्वनियामकसंबंध
स्याप्यभावप्रतियोगितावच्छेदकत्वं प्राचीनस्य मते निरूपकत्वसंबंधावच्छिन्नप्रतियोगिताकस्वामित्वाभा
वस्याप्रसिद्धतया चैत्रस्य स्वत्वादौ निरूपकतासंबंधावच्छिन्नप्रतियोगिताकस्वामित्वाभावबोधो बाधकाभा
वेनत्राधाराधेयभावसंबंधावच्छिन्न प्रतियोगिताकाभावबोधोदाहरणमुपदर्शितं स्थलेऽसंगतमेवे श्री॰
ति ॥ वस्तुतस्तु ॥ षष्ठ्याः स्वामित्वार्थकत्वमतेऽपि विनिगमनाविरहेण स्वत्वार्थकत्वस्यापि संभवेन नेदं चैत्र ७

सेसाराधाराधेयभावसंबंधावच्छिन्नप्रतियोगिताकस्वत्वाभावस्यापि बोधसंभवेन तत्र तथोदाहरणप्रदर्शनं नासंगतमे
वेतिध्येयं ॥ यत्र प्रतियोगिनः संबंधः प्रकारविधयाभासते तत्र नञ्समभिव्याहारे तत्प्रतियोगिकाभावस्यापि संबंध
प्रकारविधयाभासते एतन्निर्वाहककार्यकारणभावकल्पनमुरस्मरं तदुदाहरणमाह ॥ यत्र चेत्यादिना ॥ न सं
बंधमर्यादया लभ्यत इत्यनंतरं अपि तु प्रकारविधयैव भासत इति पूरणीयं ॥ तत्र चानुयोगिपदे सप्तम्यपेक्षेतनंतरमि
ति ॥ अभावसंबंधप्रकारकबोधेपि अनुयोगिवाचकपदे सप्तम्यपेक्षेति पूरणीयं ॥ तथा च यत्र नञ्समभिव्याहारं
विना प्रतियोगिन आधाराधेयभावसंबंधः प्रकारविधयाभासते तत्र नञ्समभिव्याहारे सति तादृशसंबंधप्रका
रकशाब्दबोधोपपत्तये तत्प्रकारकशाब्दबुद्धिं प्रति अनुयोगिवाचकपदोत्तरनञ्समभिव्याहृतसप्तमीपदज्ञा
नकारणत्वेन कल्प्यते ॥ अन्यथा यत्र प्रतियोगिनासंबंधः प्रकारविधयाभासते तत्र नञ्समभिव्याहारे सति तदभा
वसंबंधोपि प्रकारविधयाभासत इति नियमानुपपत्तेरिति भावः ॥ एतेन भूतलं न घटस्तादृशघटाभावसंबंधप्रका
रकबोधापत्तिर्निरस्ता ॥ नञ्समभिव्याहृतानुयोगिवाचकपदोत्तरसप्तमीपदज्ञानरूपकारणाभावेन तत्र त
थाबोधोत्पादासंभवादिति ॥ अत्र घटाभाववद्विशेष्यकभूतलवृत्तित्वादिप्रकारकशाब्दबुद्धिप्रति घटवी

न॰वा॰ धपदसमभिव्याहृतं पदं तत्पदोत्तरसप्तमीपरसमपदसमभिव्याहृतं नञ्पदं तद्घटितत्वेन हेतुत्वमित्येवं रीत्या कार्यका
रणभावो विशिष्यैव बोध्यः ।। ननु भावसंबंधप्रकारकबोधोदाहरणभूतलेन घटइत्यादौ न संभवति । तत्र घटादे
8 भूतलवृत्तित्वाभावप्रकारकबोधस्यैवोदयादित्यत आह ।। अत्र चेत्यादि ।। तथा च भूतलेन घटइत्यादौ
यद्यपि भूतलवृत्तित्वप्रकारकघटाभावादिविशेष्यकबोधे तात्पर्यमस्ति तदा तस्मात् भूतलवृत्तित्वप्रकारकघटाभा
विशेष्यकबोधस्यैवासत्त्वान्न तत्र तथोदाहरणं असंगतमिति भावः ।। तादृशवाक्यात्कदाचित् घटविशेष्यक
भूतलवृत्तित्वाभावप्रकारकबोधस्तत्पत्तेइत्यत्र युक्तिमाह अत एवेत्यादिना ।। अत एवानुयोगिवाचक
पदोत्तरसप्तमीपरसमभिव्याहृतनञ्स्थले कदाचित्सति ।। विशेष्यक अनुयोगिवृत्तित्वभावप्रकारक
बोधोत्पादादेव । एकविशेष्यकत्वानुभवः ।। एकविशेष्यकत्वाद्गुर्वीप्युपपन्नः ।। तथा च तादृशस्थले क
दाचित्तथाविधबोधोत्पादनस्युपगमे दृष्टिव्यागंधो न जल इत्यादौ गंधाविशिष्यकपृथिवीवृत्तित्वप्रकार ष्पि
कजलवृत्तित्वाप्रकारकबोधस्यानुभवोत्पन्नेतेति भावः ।। यत्तु ।। भूतलेन घट इत्यादौ न घटाभावा श्री॰
दिविशेष्यकभूतलवृत्तित्वादिप्रकारकबोधोत्पद्यते अपि तु घटो भूतलवृत्त्यभाववीय इत्याकारकबोध ८

सन्मतं प्रदर्शयति सप्तम्यर्थान्वयिन इत्यादिना ॥ प्रतियोगिपदोत्तरसप्तम्यर्थान्वयिनोऽभावस्य विशेषणत्वेनैव तादृश
वाक्यजन्यशाब्दबोधे भानमित्यर्थः ॥ तादृशवाक्याद् भूतलादिविशेष्यक प्रतियोगितासंबंधेन भूतलादिवृत्तित्व
विशिष्टाभावप्रकारकशाब्दबोध एवोत्पद्यत इति पर्यवसितार्थः ॥ अत्र केचिदित्यनेन नञ्जन्यशाब्दबोधे
अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबंधेन प्रतियोगिन्यभावोपस्थितिर्भासत इति नियमभंगप्रसं
गोऽस्वरसः सूचितः ॥ नञ्समभिव्याहारस्थले यद्विशेष्ये यादृशविशेषणस्यान्वयबोधो नञ्समभिव्याहार
स्थले नञा तद्विशेष्ये तादृशविशेषणाभावो बोध्यत इति नियमवादिनां मतमत्राह ॥ केचित्विति ॥ सर्वत्रैव सा
हि नञ्समभिव्याहारस्थले यद्विशेष्ये यादृशविशेषणस्य शाब्दबोधो नञ्समभिव्याहारस्थलेपि नञा तद्वि
शेष्ये तादृशविशेषणाभावो बोध्यत इत्यर्थः ॥ उपदर्शितनियमबलादिति भावः ॥ अत्रानुकूलतर्कमाह
अन्यथेति ॥ नञ्समभिव्याहारस्थले यद्विशेष्ये यादृशविशेषणस्य भ्रमः ॥ तथा च तन्मते तत्र सत्तापरस्य ल
क्षणाकल्पनापत्तिर्मन्मते तु सा न सत्ताभावे जातिशक्तित्वबोधबाधकाभावादिति भावः ॥ तत्र लक्षणोक
ल्पं विना विशेषणबोधो नञ्समभिव्याहारस्थलेपि नञा तद्विशेष्ये तादृशविशेषणाभावः प्रतीयत इति नि

न॰ वा॰ टी॰ यमादेवेत्यर्थः ॥ वचनैक्यनियमइति ॥ क्रियापदघटपदयोः समानवचनत्वनियमोऽप्युपपन्न इत्यर्थः ॥ अन्यथा
९ उपदर्शितनियममनपेक्ष्य अभावविशेष्यकबोधांगीकारे घटौ न स्त इत्यादौ द्विवचनानुपपत्तिः ॥ क्रियापदोत्तरं द्वि
वचनादिकं भावनाविशेष्यत्वे त्रित्वादिबोधस्थल एव संभवतीति नियमेन तत्राभावरूपरूपविशेष्ये द्वित्वादिबो
9 धाभावेन क्रियापदोत्तरं द्विवचनासंभव इति ॥ एवं तत्र क्रियापदोत्तर एकवचनापत्तिः विशेष्यत्वे त्रिएकबोधस्थ
ले क्रियापदोत्तरमेकवचननियमात् ॥ मन्मते तु तत्र विशेष्यीभूतघटादौ द्वित्वादिबोधे च क्रियापदोत्तरमपि
द्विवचनाद्युपपत्तिः ॥ एवं क्रियापदोत्तरमेकवचनापत्तिरपि न संभवति तत्र विशेष्यीभूतघटादावेकत्वबोध
नादिति भावः ॥ यद्येतन्मतेऽपि तत्र द्विवचनाद्यनुपपत्तिस्तदवस्थैव ॥ तथाहि ॥ एतन्मते भूतले घटौ न स्त इ
त्यादौ सप्तम्यनिरूपितत्वार्थकतया अस्त्यर्थातो विद्यमानार्थत्वकल्पया आख्यातस्य आश्रयत्वार्थकतया
नञोऽभावबोधकतया भूतलनिरूपितविद्यमानत्वाश्रयत्वाभाववान् घटादिरित्यादिबोधस्तत्रोत्पद्यते तथा च तत्र
क्रियापदोत्तरं द्विवचनानुपपत्तिस्तदर्थस्य विशेष्ये द्वित्वादेरबोधनात् घटद्वयादेस्तु विशेष्यत्वाभावादिति ॥ श्री॰
तन्न ॥ परंपराघटद्वयादेरपि क्रियापदार्थविशेष्यत्वेनानुपपत्त्यभावादुपदर्शितनियमे साक्षात्स्य ९

रासाधारणविशेष्यत्वस्य निवेशेनानुपपत्त्यभावात् । केचित्तु मतं दूषयन्ति ॥ तेषामित्यादिना ॥ गतिश्चिंतनीया । सत्ता
पदस्य सत्तासमवायेलक्षणां विनागत्यभावः तथा चैतन्मते तत्र सत्तापदास्य लक्षणाकल्पनापत्तिः । मतेनेतु स्थान ।
समवायेलक्षणां विनागत्यभावः तथा चैतन्मते तत्र सत्तापदास्य लक्षणाकल्पनापत्तिर्मतेनेतु स्थान । सत्ताभाववज्जा
तिवृत्तित्वबोधे बाधकाभावादिति भावः ॥ तत्र लक्षणाकल्पनं विनागत्यभावमेवोपपादयति । जातिसमवेतत्व
स्येत्यादिना संबंधांतरेण एकार्थसमवायादिसंबंधेन ॥ न च सत्तायां स्वरूपसंबंधावच्छिन्नजातित्ववृत्तित्वाभाववो
धे बाधकाभाव इति वाच्यं ॥ तथा च जातौ न समवेतेत्यादिव्युत्पत्तौ न समवेतेत्यादिप्रयोगापत्तेरिति ध्येयं ॥ ननु भूतले
घटो न स्तइत्यादावभावविशेष्यकबोधांगीकारे उपदर्शितव्युत्पत्त्यादिवचनाद्यनुपपत्तिर्दुरुद्धरैवेति चेन्न ॥ क्रियापा
दस्य विशेष्यकत्वचकपदसमानवचनत्वनियमान्नञ्समभिव्याहृततिक्रियापदस्थले क्रियापदस्य प्रतियोगिवा
चकसमानवचनत्वनियमांतरस्य कल्पनेनानुपपत्त्यभावादिति ॥ ननु नञ्समभिव्याहारस्थले ऽभावविशेष्यक
बोधोऽगीकार्य्य मतेन भूतले घटो न स्तइत्यादौ कथमन्वयबोधः ॥ ननावद्भूतलवृत्तित्वविशिष्टस्य घटस्याभावो
स्ति वा श्रयइत्याकारकबोध उत्पन्न मदहति ॥ घटद्वयवति भूतले ऽद्य भूतले घटौ न स्तइत्यादिप्रयोगापत्तेः ॥

तत्र भूतलवृत्तिघटद्वयाभावस्य पर्यवसितत्वाद्वैरुपर्वर्तमानत्वात् ।। नापि तत्र सप्तम्या निरूपितत्वार्थकतया एतद्भूतल
रूपितविद्यमानत्वाश्रयता वान् घटद्वयाभाव इत्याकारकबोधः संभवति ।। सप्तम्या निरूपितत्वेलक्षणाकस्य ना
पत्तेरिति चेन्न ।। भूतलवृत्तित्वविशिष्टद्वित्वविशेषावच्छिन्नघटवृत्तिप्रतियोगिताकाभावोऽस्तित्वाश्रय इत्याकारकेबा
धास्य उपगमादित्याहिङ्क् ।। ननु भूतले घटो नास्तीत्यादौ कथं नान्योन्याभावबोध इत्यत आह ।। यत्र चेत्यादि ।। त्व
भूदेन ।। अभेदसंबंधेन ।। नन्वत्र किंनियामकमित्यत आह ।। तत्र चेति ।। नञ्पदजन्यान्योन्याभावबोधे इत्य
र्थः ।। समानविभक्तिकत्वं तत्रेति ।। विशेषणवाचकपदसमानविभक्तिकविशेष्यवाचकपदं प्रयोजकमि
त्यर्थः ।। तथा च नञ्पदजन्यान्योन्याभावबोधे पि नाहशसमभिव्याहारज्ञानस्य हेतुत्वकल्प
नान्नोक्तोपदर्शितस्थलेऽन्योन्याभावबोधः ।। दधिनास्तीत्यादौ लुप्तविभक्तिरनुसंधानादेव बोध इति भावः ।। न
नूपदर्शितकार्यकारणसंभवः ।। न स्तोकं पचतीत्यादौ पाके स्तोकान्योन्याभावबोधे व्यभिचारात् तत्र विशेष्यकवाचक
पदोत्तरं सुधिभक्तेरभावेनोपदर्शितकारणाभावात् ।। एवं वैयाकरणमते चैत्रो न पचतीत्यादौ चैत्रे पाककर्तृभेदान्वयबोधात्तत्र व्यभिचारात्तत्रापि विशेषणवाचकस्याख्यातपदोत्तरं विभक्तेरभावेनोपदर्शितका श्री

रणाभावादित्यत आह ॥ विरुद्धविभक्तिविरहो वेति ॥ अत्र विरुद्धविभक्तिशब्दार्थश्च क्वचिद्विशेष्यवाचकपदोत्तरविभक्तिवृ
त्तिप्रथमात्वाद्यभाववती सुप्विभक्तिः ॥ क्वचिच्च विशेषणवाचकपदोत्तरविभक्तिवृत्तिप्रथमात्वाद्यभाववत्तु विभक्ति
अभावविशिष्टविशेषणबोधकपदेन समभिव्याहारज्ञानं कारणं क्वचिच्च विशेषणबोधकपदोत्तरविभक्तिवृत्ति
प्रथमात्वाद्यभाववत्सुब्विभक्त्यभावविशिष्टविशेष्यवाचकपदेन अपरसमभिव्याहारज्ञानकारणमिति रीत्या कार्यका
रणभावो बोध्यः ॥ एतेन विरुद्धविभक्तिविरहो वेत्यादिना नञ्पदजन्यान्योन्याभावबोधे सर्वत्र विशेषणबोधकपदोत्तर
विभक्तिवृत्तिप्रथमात्वाद्यभाववद्विभक्त्यभाववद्विशेष्यबोधकपदेन अपरसमभिव्याहारज्ञानं विशेष्यबोधकप
दोत्तरविभक्तिवृत्तिप्रथमात्वाद्यवच्छिन्नभाववद्विभक्त्यभावविशिष्टविशेषणबोधकपदेन अपरसमभिव्याहारज्ञानं
कारणमिति प्रदर्शितं इदं तु न संभवति ॥ न स्तोकं पचतीत्यादौ वैयाकरणमते चैत्रो न पचतीत्यादौ व्यभिचारादिति
निरस्तं विषयव्यवस्थया उपदर्शितरीत्या कार्यकारणभावकल्पनेनानुपपत्त्यभावादित्यलं बहुना रजतस्य नेनेति अत्र
नञ एवेति ॥ नञ्जन्यान्योन्याभावबोधे विशेषणवाचकपदसमानविभक्तिकविशेष्यवाचकपदाद्धटो नञ्समभि
व्याहारज्ञानस्य हेतुत्वादेवेत्यर्थः ॥ यजतिष्वित्यादि ॥ अत्र । नानुयाजेष्विति सप्तम्यर्थजतिष्वनुयाजभेदो बोध्यतइत्येन

ना·श·टी· नान्वयः ॥ तथा च ये यजामहं करोतीति नानुयाजेष्विति सारे अनुयाजाख्ययागविशेषभिन्नयागेषु ये यजामह इत्येवंतं मंत्रं क
११ रोति तद्व्यापारप्रतिद्वंद्वाकारकबोधजनकत्वघटनेत्यर्थः ॥ कारणसत्वे कार्येसारस्यावश्यंभावादिति भावः ॥ अत्र नञा
॥ निषेधबोधने बाधकमाह ॥ एकवाक्येति ॥ एकविधेयार्थकत्वानुरोधादित्यर्थः ॥ अत्र नञाऽन्यानाभावबोधने
अनुयाजभिन्नेषु यागेषु ये यजामह इत्येवं मंत्रकरणरूपैकविधानसंभवेन एकविधेयार्थकत्वरूपैकवाक्यत्वं
संभवति ॥ तत्र नञा निषेधबोधने चानुयागेषु ये यजामह इत्येवं मंत्रविधानं ॥ अनुयाजेषु तन्निषेधविधानमिति वि
धेयीभूतार्थद्वयविधानात् ॥ एकस्य तु विधेयीभूतैकार्थत्वस्यासंभवेनानाविधेयार्थकत्वरूपविभिन्नवाक्यत्वकल्पना
या अस्माप्यत्वेन तत्रेष्टापत्तिकरणस्याशक्यत्वादिति भावः ॥ अत्र नञा निषेधबोधने दूषणांतरमाह ॥ ये यजामह
मिति सारे इत्यादिना ॥ अत्रादिना करोतीत्यस्य परिग्रहः ॥ तथा चात्र नञा निषेधबोधने यागेषु ये यजामहं करो
ति नानुयाजेषु ये यजामहं करोतीत्याकारकबोधानुरोधात् ॥ करोतिपदस्य ये यजामहमिति पदस्य चानुषंगक
ल्पने गौरवादित्यर्थः ॥ अनुषंगकल्पनं विना तु तादृशबोधो न संभवति ॥ सकृदुच्चरितेत्यादिश्रुते त्रिभंगप्रसंगा श्री०
दिति भावः ॥ नन्वत्र नञा निषेधबोधने नानुयाजेष्विति सप्तम्याः साध्यकत्वं संभवति ॥ अनुयाजाधिकर ११

णत्वाकभावादृशानिषेधस्यबोधनात् अन्योन्याभावबोधनेचनतथाइतिसम्भ्यानैरर्थक्यभयेनपूर्वोक्तपद्वयस्यसमस्यपेत्य
अत्रनञोऽपिविशेषणविभक्तेःप्रयोगसाधुत्वरूपप्रयोजनसंभवेननानैरर्थक्यमितिभावः।। ननुसर्वत्रविशेषणविभा
क्तेःप्रयोगसाधुत्वेनीलोघटइत्यादावभेदसंबंधेनैवघटेनीलस्यान्वयबोधः।। सुवचनसंभवतिनामार्थयोःसाक्षा
दन्वयस्याव्युत्पन्नत्वादित्यतआह।। नामार्थयोरित्यादि।। भेदेन।। ऽभेदातिरिक्तसंबंधेनेत्यर्थात्।। हेतुत्वात्।। तथा
चाभेदातिरिक्तसंबंधावच्छिन्ननामार्थनिष्ठप्रकारतानिरूपितविशेष्यतासंबंधेनशाब्दबुद्धिप्रतिविषयतासंबंधे
नविभक्तिपदज्ञानजन्योपस्थितेर्हेतुत्वस्यकल्पनानोक्तानुपपत्तिः।। तत्राभेदसंबंधेनेनामार्थोपर्यपरनामार्थस्य
प्रकारतयातादृशशाब्दबोधस्याकांक्षायत्तावच्छेदकसंबंधेनतत्रोत्पत्तिभावात्तत्रानुपपत्तिरितिभावः।। मतांतरमाह।। लाघ
वेनेत्यादि।। लाघवंचात्रजन्यतावच्छेदककोटावभेदातिरिक्तसंबंधावच्छिन्नत्वानिवेशनतया।। नामार्थयोः।। तथात्वंविभ
क्तिजन्योपस्थितेर्जनकत्वं।। नचैवंसतिनीलोघटइत्यादौकथंविभक्तिजन्योपस्थितिंविनाप्यभेदान्वयबोधइत्यत्राह।।
विशेषणविभक्तिस्त्विति।। अभेदार्थिका।। सर्वत्रअभेदार्थिका।। तथाचतत्रविभक्तिजन्याऽभेदोपस्थितिंविनाऽभे
दान्वयबोधानंगीकारइतिभावः।। ननुयत्रविशेषणविभक्तेरभावस्तत्रकागतिरित्यतआह।। नीलोत्पलमित्यादि

न॰वा॰टी॰ तथा च तत्रापि यावद्धर्मविभक्तेरनुसंधानं नास्ति तत्र तावच्छाब्दी क्रियत एव शाब्दबोधे इति भावः मतेत्वित्यनेनास्वरसस्व
सूचितः॥ स च एतन्मतेऽपि नीलो घटस्थमित्यादौ लुप्तविभक्तेरनुसंधानं विनापि अनुभवसिद्धस्य शाब्दबोधस्यापलापो दुष्ट
१२ त्वः॥ वस्तुतस्तु॥ एतन्मतमेव समीचीनमाभाति तथाहि॥ विशेषणविभक्तेरभेदार्थकत्वमभ्युपेत्य नीलो घटो
स्तीत्यादौ अभेदप्रकारकशाब्दबोधांगीकारे ऽभेदाभाववान् घट इत्याकारकमानसादिकं प्रति नीलो घट इति सम
12 भिव्याहारज्ञानादिघटितशाब्दबोधसामग्र्याः प्रतिबंधकत्वं न कल्प्यते। एतन्मते तादृशशाब्दबोधसामग्रीदशायां घ
टविशेष्यकनीलाऽभेदप्रकारकयोग्यताज्ञानस्यावश्यकतया विशेषदर्शनाभावदशायां तादृशाप्रत्यक्षोत्पादाप
त्तेर्विपरीतज्ञानोत्तरप्रत्यक्षनिर्णयं प्रति विशेषदर्शनहेतुत्वकल्पनेनैव वारणसंभवात्॥ तथाविधकार्यकारण
भावस्य च बाधविचारे बहुशप्रयत्नेर्व्यवस्थापितत्वात्॥ विशेषदर्शनसत्वे च तदभावव्याप्यवत्तानिर्णयरूपशाब्दबोध
प्रतिबंधकसत्वेन तथाविधशाब्दबोधस्यानुत्पत्त्या प्रत्यक्षोत्पाद इष्टापत्तेः॥ नत्राभेदसंसर्गकशाब्दबोधांगीकारे तु
तादृशप्रतिबध्यप्रतिबंधकभावकल्पनमावश्यकमेव॥ अन्यथा तादृशशाब्दबोधसामग्रीकाले तथाविधप्रत्यक्षो श्री॰
त्पादस्य प्रकारांतरेण वारणासंभवात्॥ नत्राभेदसंबंधेन तत्र तादृशशाब्दबोधांगीकारेऽप्यभेदसंबंधावच्छिन्नप्रति १२

योगितानीलाभावप्रकारकघटविशेष्यकमानसंप्रत्युपदर्शितरीत्यानादृशशाब्दबोधसामग्र्याः प्रतिबंधकत्वाक
ल्पनेनलाघवानपायात्तुल्यंमतद्वयेपीतिवाच्यं ॥ तथाप्यभेदविशेष्यकनिरूपितत्वसंबंधावच्छिन्ननालनिष्ठप्रति
योगिताकाभावप्रकारकमानसप्रतीतावादृशशाब्दबोधसामग्र्या उपदर्शितरीत्याप्रतिबंधकत्वाकल्पनेनैतन्मते
लाघवस्यानपायादित्यलमनल्पजल्पनेन ॥ नराजइत्यादि ॥ नराज्ञः पुरुषइत्यादौ यथापुरुषेषष्ठ्यर्थस्वत्वस्याभा
वः प्रतीयतेतथात्रापियोगेसप्तम्यर्थाभेदाभावः प्रतीयतइत्यर्थः ॥ नचएवंसतिएतन्मतेनञोन्योन्याभावत्वरू
पेणशक्तिकल्पनमनर्थकंसर्वत्रसंसर्गाभावशक्तितएवंनञ्जन्यशाब्दबोधनिर्वाहात्भूतलेनघटइत्यादौविशे
षणविभक्त्यर्थाभेदस्यसंसर्गाभावएवनञाप्रत्याय्यतइत्यभ्युपगमादितिवाच्यं ॥ तत्रभेदत्वप्रकारकशाब्दबोधस्या
नुभवसिद्धस्यापलापमात्रेणनिराकरणासंभवेनतेनरूपेणापिनञःशक्तिकल्पनस्यावश्यकत्वादिति ॥ केचित्तुय
जतिषुयेयजामहंकरोतिनानुयाजेष्वित्यादौनञोनिषेधबोधकत्वेऽनुयाजेयेयजामहपदवन्मंत्रस्यविकल्पापत्तिः ॥ य
जतिषुयेयजामहंकरोतीत्यनेनयागसामान्येतत्प्राप्तावनंतरंनानुयाजेष्वपिप्राप्तत्वात् ॥ नानुयाजेष्वित्यनेनतत्रत
स्यप्रतिषिद्धत्वाच्चेतितत्रनञोननिषेधबोधकत्वंकिंतुभेदबोधकत्वमितिनानुयाजेष्वित्यादौनञोभेदबोधकत्व

न॰ वा॰ टी॰ युक्तिमाहुः तन्मन्त्रदेवपितृतदुपन्यस्यन्ति ॥ यत्त्विति ॥ कारणनिषेध इति नानुयाजेष्वित्यादिना येयजामहपदवन्मन्त्रक
रणस्य विहितस्य निषिद्धत्वादिति भावः ॥ विशेषनिषेध इत्यादि ॥ ब्राह्मणेभ्यो दधि दातव्यं न कौण्डिन्याय दातव्यमित्यादौ विशे
१२ षेधस्थले यथा ब्राह्मणेभ्यो दधि दातव्यमिति सामान्यविधेः कौण्डिन्यातिरिक्तब्राह्मणसंप्रदानकदधिदानबोधक
13 त्वं तथा प्रकृतेपि यजतिषु येयजामहं करोतीति सामान्यविधेरप्यनुयाजातिरिक्तयागे येयजामहंपदवन्मन्त्रकरण
प्रतिपादकत्वेनानुयाजेतरयागविधमन्त्रकरणस्याप्राप्त्या विकल्पासंभवादिति भावः ननु ब्राह्मणेभ्यो दधि दातव्यं न कौ
ण्डिन्याय दातव्यमित्यत्रापि सामान्यविधेर्न विशेषेतरपरत्वं ॥ न च तथा सति कौण्डिन्यस्यापि दधिदानप्रसक्त्या विकल्पा
पत्तिरिति वाच्यं ॥ तत्र नञो भेदबोधकत्वमभ्युपेत्य वाक्यैकवाक्यतया कौण्डिन्यातिरिक्तब्राह्मणसंप्रदानकर
धिदानप्रतिपादनाभ्युपगमेन कौण्डिन्यस्य तदप्राप्त्या तन्निषेधप्राप्त्या च विकल्पानवकाशात् ॥ तथा च सामामा
न्यविधेर्विशेषेतरपरत्वकल्पनस्य निर्युक्तिकत्वात् प्रकृतस्थले नञो निषेधबोधकत्वाभ्युपगमे विकल्पापत्तिर्दुरुद्ध
रैवेति तत्राह ॥ न चेति ॥ विरुद्धैकवचनत्वादिति ॥ यत्रैकनामार्थे अपरनामार्थान्योन्याभावबोधकत्वं तत्स्थले विशेषण श्री॰
विशेष्यवाचकपदयोः समानविभक्तिकत्वं तंत्रं ॥ तथा समानवचनत्वस्यापि तंत्रत्वेन प्रकृते तदभावात्तथाबोधासं १२

संभवादिति भावः ॥ ननु एकत्रामार्थे ऽपरत्रामार्थो ऽन्योन्याभाववोधे विशेषणवाचकपदविशेष्यवाचकपदयोः समानवचनत्वस्य
तंत्रत्वे प्रमाणाभाव इत्यत आह ॥ नहि स्वाम्यत्वादि ॥ नानार्थयोरभेदान्वयवोधे विशेषणवोधकपदविशेष्यवोधकपद
योः समानवचनत्वस्य तंत्रत्वमेव न तु नञ्जन्यान्योन्याभाववोधे तयोस्तदाया मिन नञ्जन्यान्योन्याभावविषयकशाब्दबुद्धि
प्रत्येकपदार्थे ऽपरपदार्थस्याभेदान्वयवोधकैकपदसमभिव्याहृतापरपदेन नञ्समभिव्याहारज्ञानस्य हेतुत्वादिति स्वामी स्त्वत्व
हर्षितमहं तो राज्ञ इत्यनेन ॥ ननु एकपदार्थे ऽपरपदार्थान्योन्याभावविशेष्यकशाब्दबुद्धिं प्रति विशेषणवोधकपद
विशेष्यवोधकपदयोः समानवचनत्वनियामकत्वकल्पने एकोनद्वाविंशत्यादेर्नञान्योन्याभावविषयकशाब्दवोधानुदय
प्रसंग इति तत्रातिदूनस्पृग्नमस्तावश्यक ॥ तथा च ब्राह्मणेभ्यो ऽधिदानमुचितं न कौ ॥ डिरापाय दानमित्यादेर्नञान्यो
न्याभावबोधने बाधकाभाव इत्यत आह पूर्वोक्तदोषोद्धारपुरस्सरं दोषान्तरमाह ॥ एकोनद्वाविंशत्यादि द्विवचनाविवक्षायां ॥ अत्र च नि
त्यद्विवचनान्तत्वाप्रामाणिकत्वे स्थले तथाविधनियमस्वीकारे तु पूर्वोक्तदोषस्यवद्धमूलत्वमिति तस्य चनार्थमुक्तं कथं चेदिति ॥
ब्राह्मणेभ्यो ऽधिदानमुचितं न कौ डिरापायेत्यनेनैव कौडिरापभिन्नब्राह्मणसंप्रदानकदधिदानबोधसंभवात् ॥ द्वितीयदानत्वपदं
निरर्थकमिति भावः ॥ अत एव तु ॥ यत्र च विशेषनिषेधस्थले सामान्यविधेर्विशेषेतरपरत्वं तत्र न एवेत्यर्थः ॥ अन्यथा

न. वा. टि. अमावास्यायां पितृभ्यो दद्यादित्यनेन रात्रौ श्राद्धकरणप्राप्त्या रात्रौ श्राद्धं न कुर्वीतेत्यनेन तत्र श्राद्धकरणनिषेधस्य प्राप्त्या तत्रा-
१४ तत्करणस्य विहितप्रतिषिद्धाभ्यां विकल्पापत्तेर्दुर्वारत्वादिति भावः ।। ननु तत्रापि नञो न्यान्याभावार्थकतया रात्रीतरकाले
14 श्राद्धकरणस्य विधानसंभवेनैव सर्वसामञ्जस्यसंभवे तत्र नञो निषेधार्थकत्वमित्यत आह ।। नहीति ।। तत्रापि रात्रौ श्राद्धं न कु-
र्वीतेत्यत्रापि ।। रात्रीतरपरत्व ।। नञोन्यान्याभावार्थकतया रात्रीतरकाले श्राद्धकरणस्य बोधकतेत्यर्थः ।। तथा च व्यर्थं तत्र
नञो निषेधार्थकत्वमिति भावः ।। रात्रिभिन्न इत्यादि ।। रात्रौ श्राद्धं न कुर्वीतेत्यादेर्नञोन्यान्याभावार्थकतया रात्रीतरका-
ले श्राद्धकरणविधायकत्वाभ्युपगमे अमावास्यायां पितृभ्यो दद्यादित्यनेन रात्रौ श्राद्धप्राप्तेर्दुर्वारतया तत्करणापत्तेर्दुर्वार-
त्वादित्यर्थः ।। ननु तथा विधवाक्ययोर्वाक्यैकवाक्यतया रात्रीतरामावास्यायां श्राद्धं कुर्वीतेत्यर्थकत्वाभ्युपगमे नष्टवैक्रि-
कस्यान्करोष इत्यत आह ।। नखल्वित्यादि ।। इह रात्रौ श्राद्धं न कुर्वीतेति वाक्यं ।। तेन क्रियारहितश्राद्धविधायकवाक्य-
न ।। नापीदं रात्रौ श्राद्धं न कुर्वीतेति वाक्यं पृथक्क्रियारहितं ।। आनुषङ्गिकक्रियातिरिक्तक्रियारहितं केवलं क्रियारहि-
तमित्युक्ते नानुयाजेष्विति दृष्टान्तासंगतेः ।। तत्रानुषङ्गिकक्रियातिरिक्तक्रियारहितं केवलं क्रियारहितमित्युक्ते नान्व- श्री
याजेष्विति दृष्टान्तासंगतेः ।। तत्रानुषङ्गिककरोतिक्रियावत्त्वात्पृथगिति ।। तथा च तयोरैक्ये एकवाक्यतासंभ १४

वतिपयोरन्यतरस्मिकं क्रियारहितं भवति ॥ अन्यथा तयोरेकतरवाक्ये क्रियापदश्रुतया एकवाक्यतया संभवत्यनुपूर्वोक्तदोषो
दुरुद्धर एवेति भावः ॥ ननु न रात्रौ श्राद्धं न कुर्वीतेत्यादौ नञो निषेधबोधकत्वमपि न संभवति तन्मते विशेषनिषेधस्थले
सामान्यविधेर्विशेषेतरपरत्वनियमेन अमावास्यायां पितृभ्यो दद्यादित्यादौ सामान्यविधेः रात्रीतरत्रामावास्याकाले
श्राद्धकरणस्य विधायकत्वेन तत्र श्राद्धकरणप्रापकवाक्यान्तरस्य चाभावेन तत्र तस्याप्रसक्तत्वात् दर्शितसामान्यविधे
र्विशेषेतरपरत्वमनभ्युपगम्य तेन तत्र तन्न्यायेन तद्विकल्पापत्तिरित्याशंकते अथ रात्रावित्यादिना ॥ उपहासपूर्वकं स
मानधीनमाह साधीयानिति ॥ तथा च प्रसक्तं हि प्रतिषिध्यत इति नियमे प्रमाणाभावेनाप्रसक्तस्यापि निषेधबोधका
भावात् न रात्रौ श्राद्धं न कुर्वीतेत्यादौ नञो निषेधबोधकत्वाभ्युपगमे क्षतिविरह इति भावः ॥ निषेधविधेरिति तादृशनि
यमस्वीकृत्याप्रसक्तस्यापि निषेधाभ्युपगमे इत्यादेः पूरणीय वैयर्थ्यमिति ॥ प्रसक्तस्यैव प्रतिषिद्धत्वमिति नियमे तु त
त्रैव करणस्यैव निषेधविधेः प्रयोजनकत्वसंभव इति ॥ इदानीं नियमाभ्युपगमे आवश्यकत्वस्य च विषयविशेषन
यंत्रितयानर्दोष इति भावः तात्पर्यानवबोधेति ॥ रात्रीतरामावास्याकालाधिकरणकश्राद्धकरणकबोधतात्प
र्यानिर्णयप्रसक्तं यत्र रात्रिश्राद्धकरणं तद्वारणस्य तत्प्रयोजनत्वादित्यर्थः । रात्रौ श्राद्ध । करणे निषेधबोधक

न·वा·टी·

१५

15

वाक्याभावेऽमावास्यायांपितृभ्योदद्यादित्यादिवाक्यतोरात्रौतदमावास्याकालेश्राद्धकरणस्यबोधासंभवः ॥ तथाविधता
त्पर्यनिर्णयकाभावात् ॥ तथाचरात्रावपिश्राद्धकरणप्रसङ्गेनरात्रौश्राद्धकरणस्यनिषेधविधौतुतथाविधवाक्या
र्थपर्यालोचनक्रमेणतथाविधविधेरुपदर्शितार्थेनतात्पर्यनिर्णयसंभवेनतस्मात्तादृशबोधसंभवेनरात्रौतत्प्राप्त्या
तत्करणाप्रसक्तेरिति ॥ नन्वेवंसतिविकल्पस्थलस्यदुर्लभत्वापत्तिरतआह ॥ एकविषयतयेत्यादि ॥ अनन्य
गतिकतयाविकल्पंविनागत्यंतराभाववर्त्तया ॥ तथाचतत्रविकल्पंविनाप्रकारान्तरासंभवेनावश्यंतत्रविकल्पस्वीका
रेणनविकल्पस्थलदुर्लभत्वापत्तिरितिभावः ॥ ननुनातिरात्रेषोडशिनंगृह्णातीत्यत्रनञाइष्टसाधनत्वस्यवाभावः
प्रतीयतेप्रकारान्तरस्यासंभवात् ॥ तच्चनसंभवतिषोडशिग्रहणविरोधात्अतआहसमुपपादयति ॥ अत्रेति ॥ नषोड
शिनंगृह्णातीत्यत्रेत्यर्थः ॥ ननुधात्वर्थाभावेविभक्त्यर्थस्यान्वयाव्युत्पत्तेश्चेत्यतआह ॥ अत्य
न्तेति ॥ तथाचतादृशाव्युत्पत्तिकल्पनेप्रमाणाभावइतिभावः ॥ अतएवतादृशव्युत्पत्तेरभावादेव ॥ ननुक्वचिद्धात्व
र्थेपिविभक्त्यर्थप्रतियोगिकस्याभावस्यान्वयेनधात्वर्थाभावेविभक्त्यर्थान्वयेनियामकाभावइत्यतआह ॥ नियम
स्त्वित्यादि ॥ तथाचयत्रधात्वर्थेविभक्त्यर्थाभावबोधेतात्पर्यंतिष्ठतिविरोधापत्तिर्नास्तितत्रतथाबोधः ॥ यत्रतुधा

श्री·

१५

त्वर्थाभावेविभक्त्यर्थान्वयबोधेनात्पर्यंतत्रतत्पेवान्वयबोधनियमइतिभावः॥ननुषोडशिग्रहस्यांगत्वेनइष्टसाधनत्वाभावा
त्नातिरात्रेषोडशिनंगृह्णातीत्यादेः॥षोडशिग्रहणेइष्टसाधनत्वाभावबोधनेपिग्रहणविधिविरोधः॥किंतुबाधेन
तत्रेष्टसाधनत्वास्यान्वयबोधासंभवात्तत्कथंतत्रग्रहणविधिविरोधेनधात्वर्थमिवेइष्टसाधनत्वान्वयबोधांगीका
रइत्यत आह॥मुख्यफलाजनकत्वेपिवेसादिः॥तथातत्रइष्टसाधनत्वाभावान्वयबोधस्वीकारेपिग्रहणविधिविरो
धविरोधोदुरपह्नवइतिभावः॥ननुग्रहणाग्रहणयोस्तुल्यफलजनकत्वेनकथंषोडशिनग्रहणेप्रवृत्तिरि
त्यत आह॥ग्रहणविध्यन्यथानुपपत्त्येति॥तथाचतयोस्तुल्यफलाभावेननोक्ताशंकायाअवकाशइतिभावः॥प्रति
योग्यनुयोगिभावः॥प्रतियोगित्वमनुयोगित्वंआधाराधेयभावः आधारत्वमाधेयत्वंउभयत्रउभयोःकीर्तनं॥ तत्तुल्य
वित्तिवेद्यत्वाभिप्रायेण॥ननुनञोऽभावबोधकत्वेकथंभूतलेनघटइत्यादौभूतलाधिकरणत्वासंबंधेननञर्थान्यो
न्याभावस्यान्वयोन्यान्याभावेचप्रतियोगितासंबंधेनघटादेर्वान्वयनामार्थयोर्भेदेनान्वयबोधानंगीकारादित्यत आ
ह॥निपातेतरेति॥अन्वयनिपातातिरिक्तेत्यर्थः॥तथाचफलवत्वेलिंग्यातावयज्ञस्यत्राप्रबोधंप्रतिप्रकारीभूतविभक्त्य
र्थापास्थितेर्न्नेहतत्वमतएवतस्य॥इत्याघचपवोधो॥चंद्रवत्मुखमित्यादौइवाद्यर्थान्वयबोधे॥आदिनानञोति

रिक्तनिपातापरिग्रहः॥॥ ननु नञो अभावार्थकत्वे अघटं भूतलमित्यादौ कथं नानाधर्माभ्यामेकधर्मिबोधकत्वरूपसामा
नाधिकरण्योपपत्तिरित्यत आह॥ अघटं भूतलमित्यादि॥ संसर्गाभावान्योन्याभावार्थकनञ्भेदेनोदाहरणद्वयं॥ अ
घटमित्यत्र नपुंसकलिंगनिर्देशात्तु न विग्रहो घटो यत्रेति बहुव्रीहिसमासस्पष्टीकरणाय अन्यथा अघटइत्युक्ते न घ
टो अघटइति नञ्तत्पुरुषेपि तथा प्रयोगसंभवेन तत्र च नञो ऽन्योन्याभाववदर्थकतया संसर्गाभाववत्त्वाक्षणिकनञ
उदाहरणासंभवइति ध्येयं॥ अभाववत्त्वरत्न॥ अभाववद्बोधकता॥ यत्रैव बहुव्रीहिसमासे सर्वत्रान्तरपदएव लक्ष
णा अन्यथा चित्रगुरित्यादौ गवादिपदएव न प्रामाणिकादिति॥ एवं च अघटं भूतलमित्यादावपि घटपदस्यैव घटाभाववद्वा
ति लक्षणा वक्तुमुचितं॥ तत्कथं अत्रापि नञो ऽभाववतिलक्षणोक्तिः संगच्छतेइति॥ तदसत्॥ चित्रगुरित्यादौ चि
त्रगुपदस्य लक्षणाङ्गीकारे स्वाश्रयभिन्नगोस्वामित्वात्मकपरंपरासंबंधरूपशक्यसंबंधरूपलक्षणाकसंबंधात्मकलक्ष
णाकल्पनेगौरवमिति लाघवान्नञ्गोपदस्य लक्षणाकल्पनात्॥ लाघवं च स्वस्वामित्वात्मकसाक्षात्संबंधरूपल
क्षणाङ्गीकारेण प्रकृते च घटपदस्य घटाभाववति लक्षणाङ्गीकारे न तथा लाघवसंभवः॥ अपितु नञ्पदपरपद श्री॰ १६
संबंधरूपलक्षणाकल्पने गौरवमिति लाघवान्नञ एव तत्र स्वसंबंधित्वरूपलघुशक्यसंबंधात्मकलक्षणा

रकस्यनम्रचित्तमिति ॥ यत्तु नियामकत्वं नञ्शब्दप्रतीपप्रकारीभूतविभक्त्यर्थोपस्थितेरिदंतत्त्वमुपपद्यते तन्मतमाह ॥ केचित्ति
ति ॥ प्रतियोगिपदोत्तरसुप्पदमिति ॥ भूतलं न घट इत्यादौ घटादिबोधकपदोत्तरं सुप्पदमित्यर्थः ॥ ननु सर्वत्र प्रतियोगित्वस्य न
ञ्समभिव्याहृतप्रतियोगिबोधपदोत्तरसुबर्थत्वे घटे योऽभावो न घटस्येति प्रतियोग्यापत्तिः ॥ तत्रापि घटनिष्ठप्र
तियोगित्वस्वरूपसम्बन्धेनाभावस्य घटाभावे विद्यमानत्वात् ॥ न च न घटस्येत्यत्र निरूपकत्वसंबंधावच्छिन्नघटनि
ष्ठप्रतियोगितानिष्ठप्रतियोगिताकाभावबोधानभ्युपगमान्न तथा प्रयोग इति ॥ घटनिष्ठप्रतियोगितायाः निरूपक
तासंबंधेन घटाभावे विद्यमानत्वादिति वाच्यं ॥ इत्थं नियामकस्य प्रतियोगितापदेऽवच्छेदकत्वानङ्गीकारेण तथा
केरशक्यत्वादित्यत आह ॥ अनुयोगित्वं वेति ॥ वाकारो व्यवस्थितविकल्पसंपादकः ॥ तथा च क्वचित्प्रतियो
गित्वं तत्त्वाविधसुबर्थः ॥ क्वचिदनुयोगित्वं वेति लब्धं अत एव पटे न घटाभाव इत्यादौ पटे घटाभावस्य प्रतियोगि
त्वाभावबोधस्यानुभवोऽपि संगच्छत इति ध्येयम् ॥ न चोक्तरूपसुपोऽधिकरणत्वार्थकत्वे सर्वत्र नञुत्तरसुपोऽनुसंधान
कल्पनं तत्र तत्समलक्षणाकल्पनं चेत्युभयकल्पने गौरवं नञ्प्रयोगस्थाने त्वेवाभाववत्तिलक्षणाकल्पनमुचितमि
त्याशयेनाह ॥ नञो वेति ॥ ननु नञोऽन्योन्याभावबोधने विशेषणवाचकपदविशेष्यवाचकपदयोर्विरुद्धवि

न॰वा॰टि॰ भक्तिरादिद्वित्त्वं तत्रमिति पूर्वमुक्तं तत्र विरुद्धविभक्तिकत्वं विरुद्धार्थप्रतिपादकविभक्तिकत्वं ॥ अन्यथाव्युत्पत्त्यानुरा
१७ सनस्थलेकर्मत्वाद्यर्थकप्रथमान्तपदार्थस्यान्योन्याभावस्य एकत्वाद्यर्थकप्रथमान्तपदार्थेऽन्वयबोधापत्तेः ॥
तथाच प्रतियोगिवाचकपदोत्तरैकत्वप्रतिपादकविभक्तेर्विशेषणवाचकपदोत्तरविभक्त्यर्थप्रतियोगित्वा
17 दिविरुद्धार्थकत्वात् ॥ एवं नञर्थसंसर्गाभावेऽभेदेनेतरपदार्थान्वयानुभवेऽनुयोगिवाचकपदोत्तरसप्तम्यपे
क्षाऽऽदेः च पूर्वोक्तं तदर्पितानुतादृशस्तु पोऽधिकरणत्वलक्षणयैव संभवति न तु नञो भाववत्त्वलाक्षणिकत्वेन
तत्कल्पेन तथाविधभेदान्वयबोधाप्रसिद्धेः ॥ तथाविधाभेदान्वयबोधेतु नादृशसप्तम्या अपेक्षा न संभव
ति अघटं भूतलमित्यादौ तदभावात् ॥ एवं च क्वचिन्नञान्योन्याभावः प्रतिपाद्यते क्वचित्संसर्गाभावः प्रति
पाद्यत इत्यत्र नियामकाभावात् ॥ सर्वत्र तदुभयबोधप्रसङ्ग इत्यत आह ॥ विभक्त्यर्थेति ॥ विभक्त्यर्थस्यान्यो
न्याभावबोधने अनुयोगिवाचकपदसमानविभक्तिकपदार्थस्य संसर्गाभावबोधने च नञः सामर्थ्यमित्यर्थः ॥
तथानुरोधेन तत्तत्तदानुपूर्वीज्ञानस्य हेतुत्वकल्पनान्न नियमप्रसङ्ग इति भाव तथाविधकार्यकारणभा श्री
वकल्पनं पूर्वमतेऽप्यावश्यकमित्याह ॥ तेनेति ॥ तथाविधसामर्थ्यकल्पनेनेत्यर्थः ॥ संसर्गाभावः ॥ संसर्गा॥ १७

न॰ वा॰ टी॰ भावकस्मेदः ॥ तथा च तादृशकार्यकारणभावकल्पने पूर्वमतेपि पर्शते सुस्थलेषु तत्तदन्वयबोधापत्तिर्दुर्वारैवेति तादृशाका
१६ र्यकारणकल्पनमावश्यकमिति भावः ॥ न चैवं वैयाकरणमतेपि न पचतीत्यादौ नञोऽसमासाभावबोधकत्वाभावापत्ति
१८ रिष्टत्वादित्याहुरित्यनेनास्वरसः सूचितः ॥ सवद्गुण्यं नह्यधिकृत्यादौ धिग्रहोत्तरलुप्तविभक्तेरनुसंधानं विप्रिणं नाश
ब्दबोधस्यानुभवसिद्धस्यापलापो वाध्य इति ॥ अत्र सूक्ष्मदृक्कवायत्किंचित्कलितं मया ॥ अत्र ध्यायन्तु सन्तोषेणैत्र
18 वादमपि वादिनः ॥ ॥ इति श्रीरघुदेवभट्टाचार्यविरचिता नञ्वाददीपिणी समाप्ता सं मत १८१२ मीति जेठ शु
दी ५ वार बुधवार ० ० ०

श्री
१८